# Raivatamanukritam Narayana Stotram

# रैवतमनुकृतं नारायणस्तोत्रम्

## Document Information

Text title : Raivatamanukritam Narayana Stotram

File name : raivatamanukRRitaMnArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 55/1-13||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

# रैवतमनुकृतं नारायणस्तोत्रम्

श्रीनारायण उवाच ।
शृणु लक्ष्मि ! रैवताख्यो मनुर्वैकुण्ठमाप्तवान् ।
तुष्टाव च महाप्रेम्णा दयालुं मां त्वयाऽन्वितम् ॥ १॥

नमः सच्चित्स्वरूपायानन्दसन्दोहवार्धये ।
नमोऽस्त्वेकस्वरूपायोभयरूपाय ते नमः ॥ २॥

नमो हिरण्यकेशाय श्मश्रवश्मश्रुमते नमः ।
नमः स्तन्याऽस्तन्यवते बीजाऽबीजधृते नमः ॥ ३॥

नमो बर्हिः प्रचिह्नायाबर्हिश्चिह्नाय ते नमः ।
नमो विश्वक्प्रवालाय क्वचिद्बालाय ते नमः ॥ ४॥

नमो दक्षिणसत्त्वाय ।
वामसत्त्वाय ते नमः ।
नम ऊर्ध्वस्वरूपायानूर्ध्वरूपाय ते नमः ॥ ५॥

नम आधेयरूपायाधाररूपाय ते नमः ।
नमो द्विदलरूपायाङ्कुरप्रसूतये नमः ॥ ६॥

नमो वैकुण्ठवासाय कुण्ठवासाय ते नमः ।
नमो मानसरूपाय भक्तरूपाय ते नमः ॥ ७॥

नमस्ते करुणासिन्धो नमः सौराष्ट्रवर्धिने ।
नमो रैवतवासाय दामोदराय ते नमः ॥ ८॥

नमः पत्नीव्रताख्याय नमः कृष्णाय विष्णवे ।
नमोऽनन्तस्वरूपाय ममान्तर्यामिणे नमः ॥ ९॥

स्वतन्त्रस्त्वं महाविष्णो न जाने त्वं किमिच्छसि ।
भक्तो यदर्थमाहूतस्तद्धै विधातुमर्हसि ॥ १०॥

दासोऽयं कृपया विष्णो नेयः पारं भवाध्वनः ।
यत्र ते चरणौ स्तस्तद्देशो मे ह्यरणं भवेत् ॥ ११॥

न वै त्याज्यः कृपानाथ दासोऽयं शरणागतः ।
करुणया गृहीतोऽयं न वै तं त्यक्तुमर्हसि ॥ १२॥

यदिष्टं क्षेमकृल्लोके तदिष्टं संविधीयताम् ।
इति स्तुत्वा विरराम रैवतो भक्तसत्तमः ॥ १३॥

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ५५-अध्यायान्तर्गतं रैवतमनुकृतं नारायणस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय ५५/१-१३॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 55/1-13..

Proofread by PSA Easwaran

*Raivatamanukritam Narayana Stotram*
pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*